श्री दामोदराष्टकं

श्री दामोदराष्टकं

नमामीश्वरं सच्चिदानंदरूपं
लसत्कुंडलं गोकुले भ्राजमानं |
यशोदाभियोलूखलाद्धावमानं
परामृष्टमत्यंततो द्रुत्य गोप्या || 1 ||

रुदंतं मुहुर्नेत्रयुग्मं मृजंतं
करांभोजयुग्मेन सातंकनेत्रं |
मुहुः श्वासकंपत्रिरेखांककंठ-
स्थितग्रैव-दामोदरं भक्तिबद्धं || 2 ||

इतीदृक् स्वलीलाभिरानंदकुंडे
स्वघोषं निमज्जंतमाख्यापयंतं |
तदीयेषिताज्ञेषु भक्तैर्जितत्वं
पुनः प्रेमतस्तं शतावृत्ति वंदे || 3 ||

वरं देव मोक्षं न मोक्षावधिं वा
न चान्यं वृणेऽहं वरेषादपीह |
इदं ते वपुर्नाथ गोपालबालं
सदा मे मनस्याविरास्तां किमन्यैः || 4 ||

इदं ते मुखांभोजमत्यंतनीलैर्-
वृतं कुंतलैः स्निग्ध-रक्तैश्च गोप्या |
मुहुश्चुंबितं बिंबरक्तधरं मे
मनस्याविरास्तां अलं लक्षलाभैः || 5 ||

नमो देव दामोदरानंत विष्णो
प्रसीद प्रभो दुःखजालाब्धिमग्नं |
कृपादृष्टिवृष्ट्यातिदीनं बतानु
गृहाणेश मां अज्ञमेध्यक्षिदृश्यः || 6 ||

कुवेरात्मजौ बद्धमूर्त्यैव यद्वत्
त्वया मोचितौ भक्तिभाजौ कृतौ च |
तथा प्रेमभक्तिं स्वकं मे प्रयच्छ
न मोक्षे ग्रहो मेऽस्ति दामोदरेह || 7 ||

नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने
त्वदीयोदरायाथ विश्वस्य धाम्ने |
नमो राधिकायै त्वदीयप्रियायै
नमोऽनंतलीलाय देवाय तुभ्यं || 8 ||

इति श्रीमद्पद्मपुराणे श्री दामोदराष्टाकं संपूर्णं ||